WWW.GRADESETTER.COM




WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

# देववाणी - संस्कृतम्

## चतुर्थ: सर्ग:

सा विद्या या विमुक्तये

विद्या भारती

प्रकाशक :

**शिशु मन्दिर प्रकाशन**

प्रोफेसर लेन, दरियापुर गोला,

पटना - 4

विद्या भारती अखिल भारतीय शिक्षा संस्थान के सौजन्य से प्रकाशित



WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

प्रकाशक :
शिशु मन्दिर प्रकाशन
प्रोफेसर लेन, दरियापुर गोला,
पटना – 4

युगाब्द ५१०६
विक्रम संवत् २०६१
ई० सन् २००४

मुद्रक :
ग्राफिक आर्ट प्रिन्टर्स
डीग गेट, मथुरा (उ० प्र०)

## पुस्तक प्राप्ति स्थान

**शिशु मन्दिर प्रकाशन**
प्रोफेसर लेन, दरियापुर गोला,
पटना – 4

विद्या भारती अखिल भारतीय शिक्षा संस्थान के सौजन्य से प्रकाशित

सर्वाधिकार प्रकाशकाधीन

मूल्य दस रुपए



WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

# आचार्येषु निवेदनम्

भाषते (भाष्लृ व्यक्तायां वाचि इति धातोः) इति भाषा शब्दः भवति। यदि संस्कृते भाषणम् अर्थात् सम्भाषणम् एव न भवति तर्हि संस्कृतस्य भाषात्वं कथं भवति? अतः संस्कृतेन सम्भाषणं करणीयम्। सम्भाषणमाध्यमेन भाषाभ्यासः शीघ्रं भवति। सम्भाषणेन भाषाविकासः अपि भवति। संस्कृतसम्भाषणे छात्राः आनन्दम् अनुभवन्ति, रुचिं कुर्वन्ति च। स्वबालाः संस्कृतेन सम्भाषणं कर्तुं समर्थाः भवन्ति चेत् अभिभावकानाम् अपि बालानां विषये गौरवानुभूतिः भवति।

गतशताधिकवर्षेभ्यः अनुवादमाध्यमेन संस्कृतं पाठितवन्तः। एषः विधिः आङ्ग्लविधिः अस्ति। अस्माभिः भारतीयविधिना पाठः करणीयः।

श्रवणं, भाषणं, पठनं, लेखनं च इति भाषाभ्यासस्य चत्वारि सोपानानि सन्ति। प्रथमं श्रवणम्, अनन्तरं भाषणं, पश्चात् पठनं, तदनन्तरं लेखनम् इति एतेन क्रमेण भाषापाठः करणीयः। अतः प्रत्येकं पाठः आचार्येण प्रथमं मौखिकरूपेण उपस्थापनीयः। अनन्तरं तानि वाक्यानि छात्रैः प्रयोक्तव्यानि। तदनन्तरं पुस्तकपठनम्, अभ्यासलेखनं च। एतेन प्रकारेण संस्कृतस्य संस्कृतमाध्यमेन एव पाठः करणीयः।

अभिनयेन, क्रियाविधिना, वस्तुदर्शनेन अथवा चित्रदर्शनेन कस्यापि शब्दस्य वाक्यस्य वा अनुवादेन विना एव अर्थः बोधयितुं शक्यते। अतः सम्भाषण–माध्यमेन भाषा–पाठः करणीयः। तेन छात्राणां संस्कृतभाषया व्यवहारसामर्थ्यं भवति।

एतस्मिन् पुस्तके छात्राणाम् अभिव्यक्ति–कौशलवर्धनाय एव प्राथमिकता दत्ता अस्ति। भाषापठनस्य उद्देश्यं केवलं भाषायाः अवगमनम् एव न, अपितु भाषायाः प्रयोगः, तया भाषया विचार – अभिव्यक्तिः अपि भवेत्।

संस्कृत–आचार्यः सर्वदा संस्कृतेन एव सम्भाषणं करोति। तदा तस्य आचार्यस्य सम्भाषणं श्रुत्वा छात्राणाम् अपि संस्कृतसम्भाषणे रुचिः भवति। छात्राः अपि संस्कृतेन वदन्तु इति आग्रहः करणीयः, प्रोत्साहनं करणीयम्। उत्तमरूपेण संस्कृतेन यः छात्रः सम्भाषणं करोति तस्मै पुरस्कारः दातव्यः। विद्यालये प्रतिसप्ताहं कतिचन संस्कृत–व्यवहारवाक्यानि लिखित्वा स्थापनीयानि। सोमवासरः 'संस्कृतसम्भाषणदिनम्' इति विद्याभारत्याः निर्णयः अस्ति, अतः सोमवासरे अनिवार्यरूपेण सर्वैः संस्कृतेन सम्भाषणं करणीयम्। प्रार्थनासभायां, विशेषकार्यक्रमेषु च बालकानां माध्यमेन संस्कृत– सम्भाषणप्रदर्शनं कारणीयम्। एवं विद्यालये संस्कृतसम्भाषणस्य वातावरण–निर्माणं भविष्यति।

**आलोक : मातृभाषाम् आश्रित्य प्रश्नपत्राणां रचना भवति चेत् अस्माकं लक्ष्यपूर्तिः न जायते, अतः प्रश्नपत्राणां रचना सदैव संस्कृत–भाषया एव अनिवार्यत्वेन करणीया।**

WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

# अभिभावकों से निवेदन

किसी भी भाषा का अभ्यास करना हो तो उस भाषा में ही बोलना चाहिए। वार्तालाप के माध्यम से संस्कृत का अभ्यास भी शीघ्र होगा। सुनना, बोलना, पढ़ना और लिखना भाषाभ्यास के ये चार सोपान हैं। संस्कृत में श्रवण कौशल, पठन कौशल, लेखन कौशल ये तीन कौशल एक छात्र में होते हुए भी उस छात्र का संस्कृत में भाषण कौशल भी हो यह निश्चित नहीं है। परन्तु जिस छात्र में संस्कृत बोलने का कौशल होता है, उसमें शेष तीन कौशल शीघ्र ही आ जाते हैं। अतः संस्कृत में बोलने के लिए अधिक आग्रह किया जाए। घर में बच्चे परस्पर वार्तालाप संस्कृत भाषा में ही करें ऐसा प्रयत्न किया जाए तथा उन्हें प्रोत्साहित भी किया जाए। घर में यदि अतिथि आएँ तो उनके समक्ष बच्चों द्वारा संस्कृत भाषा में वार्तालाप कराइए। संस्कृत भाषा बोलना यह गर्व एवं स्वाभिमान का विषय है। पुस्तक के सभी पाठों में जो भी वाक्य और शब्द हैं छात्र उन सबका सरलतापूर्वक प्रयोग करने में समर्थ हों ऐसी अपेक्षा है। इसलिए उन वाक्यों का बार-बार व्यवहार में प्रयोग कराएँ।

घर में दीवार पर, दैनिक व्यवहार में आने वाले शब्दों एवं वाक्यों को संस्कृत में अर्थ सहित लिखकर उनके चार्ट लगाएँ तो बच्चे उनको देखकर भी संस्कृत का अभ्यास कर सकते हैं।

संस्कृत को अनुवाद विधि से पढ़ाना आंग्ल विधि है। विगत सौ वर्षों से भी अधिक समय से भारत में उसी विधि से पढ़ाया जा रहा है। जिससे आज देश में सब स्थानों पर दस पन्द्रह वर्ष संस्कृत पढ़ने के बाद भी संस्कृत भाषा का ठीक से अभ्यास नहीं होता है और संस्कृत कठिन है ऐसी भावना पनपती है। इस समय विद्या भारती के विद्यालयों में संस्कृत का शिक्षण नये प्रकार से प्रारम्भ हुआ है। इस नयी शिक्षण विधि का नाम है "सरल सम्भाषण विधि" या संस्कृत को संस्कृत माध्यम से पढ़ाना। इस विधि से छात्रों को जल्दी संस्कृत का अभ्यास होता है।

कृपया आप भी घर में संस्कृत का अभ्यास करें जिससे बच्चों को संस्कृत सीखने में भी सुविधा होगी और संस्कृत साहित्य में जो ज्ञान, विज्ञान एवं तन्त्रज्ञान निहित है उसे आप स्वयं भी जान सकेंगे।

WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

# देववाणी-संस्कृतम्

## विषयानुक्रमणिका


| पाठक्रमाङ्कः | | पाठनाम | पृष्ठसंख्याः |
|---|---|---|---|
| | मङ्गलाचरणम् | | ६ |
| १. | प्रथमः पाठः | धीराः बालकाः | ७ |
| २. | द्वितीयः पाठः | मित्र-सम्भाषणम् | १० |
| ३. | तृतीयः पाठः | नष्टः पिष्टघटः | १२ |
| ४. | चतुर्थः पाठः | गीतम् | १६ |
| ५. | पञ्चमः पाठः | तृतीया विभक्तिः | १७ |
| ६. | षष्ठः पाठः | अहो विस्मरण-शीलता | २० |
| ७. | सप्तमः पाठः | रविवासरे कुत्र गमिष्यति | २३ |
| ८. | अष्टमः पाठः | सुभाषितानि | २५ |
| ९. | नवमः पाठः | कः बलवान् | २६ |
| १०. | दशमः पाठः | वस्तु-प्रदर्शिनी | २९ |
| ११. | एकादशः पाठः | स्वामी विवेकानन्दः | ३२ |
| १२. | द्वादशः पाठः | सूक्तयः | ३५ |
| | परिशिष्टम् | शब्दार्थाः | ३६ |


# चतुर्थः सर्गः

WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

# मङ्गलाचरणम्



सरस्वति ! नमस्तुभ्यं, वरदे ! कामरूपिणि !
विश्वरूपे ! विशालाक्षि ! विद्यां देहि सरस्वति !।।



WWW.GRADESETTER.COM

WWW.GRADESETTER.COM


# धीराः बालकाः



एकस्मिन् ग्रामे त्रयः बालकाः आसन्। ग्रीष्मावकाशस्य समयः आसीत्। ते प्रवासस्य योजनां कृतवन्तः। अभिभावकानाम् अनुमतिं प्राप्तवन्तः। नूतन-वस्त्राणि धृतवन्तः। बसस्थानकं गतवन्तः। बसयानस्य आरोहणं कृतवन्तः। बसयानं प्रस्थितम्।

मार्गे अरण्यम् आसीत्। अकस्मात् लुण्ठकाः यानं स्थगितवन्तः, झटिति यानस्य आरोहणं कृतवन्तः च। ते भुशुण्डिं दर्शितवन्तः, उक्तवन्तः च – "भोः यात्रिणः ! स्व-आभूषणानि, स्वधनं च सर्वं यच्छन्तु। अन्यथा मारयामः" इति।

सर्वे यात्रिणः भीताः अभवन्। तदा त्रयः बालकाः शनैः-शनैः लुण्ठकानां पृष्ठतः गतवन्तः। झटिति तेषां हस्तं गृहीतवन्तः। आयुधानि पातितवन्तः । सर्वे यात्रिणः मिलित्वा लुण्ठकान् ताडितवन्तः। आरक्षकाय च दत्तवन्तः ।

सर्वे बालकानां धैर्यं श्लाघितवन्तः।



WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

| पुल्लिङ्गे | | स्त्रीलिङ्गे | |
|---|---|---|---|
| एकवचनम् | बहुवचनम् | एकवचनम् | बहुवचनम् |
| ताडितवान् | ताडितवन्तः | ताडितवती | ताडितवत्यः |
| कृतवान् | कृतवन्तः | कृतवती | कृतवत्यः |
| गतवान् | गतवन्तः | गतवती | गतवत्यः |
| दत्तवान् | दत्तवन्तः | दत्तवती | दत्तवत्यः |

## अभ्यासाः

१. प्रश्नानाम् उत्तरं लिखतु :-

१. त्रयः बालकाः कां योजनां कृतवन्तः ?
२. बालकाः केषाम् अनुमतिं प्राप्तवन्तः ?
३. बालकाः केन यानेन प्रवासं कृतवन्तः ?
४. अकस्मात् यानं के स्थगितवन्तः ?
५. लुण्ठकाः किम् उक्तवन्तः ?
६. सर्वे किमर्थं बालकानां श्लाघनं कृतवन्तः ?

२. कोष्ठके दत्तानां वर्तमानकालिकरूपाणां भूतकालिकरूपाणि (बहुवचने) लिखतु :-

उदा० - बालकाः पाठं (पठन्ति) <u>बालकाः पाठं पठितवन्तः।</u>

१. छात्राः कोलाहलं (कुर्वन्ति) ---------------------।
२. ते फलानि (खादन्ति) ---------------------।
३. बालिकाः गीतं (गायन्ति) ---------------------।
४. ताः फलरसं (पिबन्ति) ---------------------।
५. वयं विद्यालयं (गच्छामः) (पु०) ---------------------।
६. वयम् उद्यानं (पश्यामः)(स्त्री०) ---------------------।

WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

३. रिक्तस्थानानि भूतकालिकरूपैः पूरयतु :-

उदा० - बालकाः मन्दिरं ______________________ । (गम्)

बालकाः मन्दिरं गतवन्तः ।

१. सेवकाः कार्यं ______________________ । (कृ)
२. सेविकाः पात्रं ______________________ । (प्रक्षाल्)
३. छात्राः प्रश्नं ______________________ । (पृच्छ्)
४. धनिकाः धनं ______________________ । (दा)
५. बालिकाः पत्रं ______________________ । (प्रेष्)
६. सैनिकाः देशं ______________________ । (रक्ष्)

४. एतेषां वाक्यानां बहुवचन-वाक्यानि लिखतु :-

उदाहरणम् - बालकः क्रीडाङ्गणे क्रीडितवान् ।

बालकाः क्रीडाङ्गणे क्रीडितवन्तः ।

१. छात्रः देवं नमस्कृतवान् । ______________________ ।
२. शिक्षकः पाठं पाठितवान् । ______________________ ।
३. बालिका चित्रं लिखितवती । ______________________ ।
४. शिक्षिका लेखनीं दत्तवती । ______________________ ।
५. अहं सरस्वती-वन्दनां कृतवान् । ______________________ ।
६. अहं मिष्ठान्नं खादितवती । ______________________ ।

---

*आचार्य के लिए :-*

*आचार्य कथा को वातावरण निर्माणपूर्वक भावपूर्ण विधि से छात्रों के समक्ष मौखिक रूप से संस्कृत में प्रस्तुत करें तथा छात्रों को कथा संस्कृत में प्रस्तुत करने के लिए प्रेरित करें।*

*इसी प्रकार धीर बालक अभिमन्यु, प्रह्लाद, भगतसिंह, आजाद आदि की धीरता की कथा सुनाएँ।*



WWW.GRADESETTER.COM

WWW.GRADESETTER.COM 

# मित्र–सम्भाषणम्



" राकेश ! ह्यः भवान् कुत्र आसीत् ?"
" अहम् अतुलस्य[१] गृहे आसम् ।"
" तत्र कः विशेषः आसीत् ?"
" अतुलस्य[२] जन्म–दिनोत्सवः आसीत् ।"
" तत्र के के छात्राः आसन् ?"
" तत्र योगेशः[३], सज्जीवः[४], विजयः[५], आनन्दः[६] इत्यादयः आसन् ।"
" भवतः गृहतः के के गतवन्तः ?"
" वयं सर्वे अपि गतवन्तः ।"
" कदा प्रत्यागतवन्तः ?"
" रात्रौ अष्टवादने ।"

| वर्तमान काले | | भूतकाले | |
|---|---|---|---|
| एकवचनम् | बहुवचनम् | एकवचनम् | बहुवचनम् |
| अस्ति | सन्ति | आसीत् | आसन् |
| अस्मि | स्मः | आसम् | आस्म |

## अभ्यासाः

१. उपरितन – सम्भाषणे १, २, ३, ४, ५, ६ इत्यत्र गणेशः, गोविन्दः, मोहनः, महेशः, राजेशः इति शब्दपरिवर्तनं कृत्वा पुनः पठतु ।



WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

२. कोष्ठके दत्तानां पदानां साहाय्येन वाक्यानि रचयतु :-
(दूरदर्शनम्, सङ्गणकम्, दूरभाषा, कारयानम्, अश्वः, कुक्कुराः, धेनवः, अजाः, सेवकाः, बान्धवाः)

पूर्वम् अहं धनिकः आसम्। तदा -

१. मम गृहे दूरदर्शनम् आसीत्। ६. मम गृहे कुक्कुराः आसन्।
२. मम गृहे ----------------। ७. मम गृहे ----------------।
३. ----------------। ८. ----------------।
४. ----------------। ९. ----------------।
५. ----------------। १०. ----------------।

३. कोष्टकं दृष्ट्वा कः कदा कुत्र आसीत् इति लिखतु :-

| | | |
|---|---|---|
| सुखेश्वरः | १०.०० | विद्यालयः |
| रेखा | ११.०० | क्रीडाङ्गणम् |
| कुमारः | १२.०० | गृहम् |
| अहम् | ७.०० | ग्रन्थालयः |
| वयम् | ८.०० | मन्दिरम् |
| महिलाः | ४.०० | उद्यानम् |

यथा- १. सुखेश्वरः दशवादने विद्यालये आसीत्।
२. ----------------।
३. ----------------।
४. ----------------।
५. ----------------।
६. ----------------।

सन्धिविच्छेद :- जन्मदिन + उत्सवः, इति + आदयः, प्रति + आगतवन्तः

---

*आचार्य के लिए :-*
*पाठ के आधार पर आचार्य द्वारा छात्रों से परस्पर संस्कृत में अतिरिक्त सम्भाषण अभ्यास करवाया जाए।*



WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

तृतीयः पाठः

# भग्नः पिष्टघटः

एकं नगरम् आसीत्। तत्र एकः दरिद्रः वसति स्म। सः भिक्षाटनेन जीवनयापनं करोति स्म। एकदा सः पिष्टेन पूर्णम् एकं घटं प्राप्तवान्। तं घटं सः नागदन्ते अवलम्बितवान्। सः तस्य अधः एव उपविशति स्म। तं घटम् एव एक-दृष्ट्या पश्यति स्म।



एकदा रात्रिकाले सः विचारितवान् यदि देशे दुर्भिक्षः भविष्यति तर्हि एतस्य पिष्टघटस्य शतरुप्यकाणां मूल्यं भविष्यति। तदा अहम् एतस्य विक्रयणं करिष्यामि तेन धनेन अजद्वयं च क्रेष्यामि। कालान्तरे तेन अजसमूहः एव भविष्यति। अनन्तरम् अजसमूहस्य विक्रयणं करिष्यामि, महिषीं च क्रेष्यामि। कालान्तरे मम गृहे महिषी-समूहः भविष्यति। तासां विक्रयणं करिष्यामि, यथेष्टं धनं च सम्पादयिष्यामि। तेन विशाल-गृहस्य निर्माणं करिष्यामि। तदा कोऽपि धनिकः आगमिष्यति। रूपवतीं स्वकन्यां मह्यं दास्यति। अनन्तरम् मम पुत्रः भविष्यति। देवशर्मा इति तस्य नामकरणं करिष्यामि। यदा सः चलनसमर्थः भविष्यति तदा अहं अश्वशालायां पुस्तकं पठिष्यामि। तदा देवशर्मा मम समीपम् आगमिष्यति। तदा तं बालं गृह्णातु, इति बाल-मातरं आज्ञापयिष्यामि। यदा सा मम वचनं न श्रोष्यति तदा अहं कोपेन पादप्रहारं करिष्यामि,



WWW.GRADESETTER.COM

WWW.GRADESETTER.COM
इति एवं सः विचारितवान् पादप्रहारं च कृतवान्। पिष्टेन पूर्णः घटः पतितः, भग्नः च अभवत्। तस्य स्वप्नः अपि भग्नः।

विशेषरूपाणि

| वर्तमानकाले | भविष्यत्काले | वर्तमानकाले | भविष्यत्काले |
|---|---|---|---|
| पिबति | पास्यति | लिखति | लेखिष्यति |
| ददाति | दास्यति | मिलति | मेलिष्यति |
| जानाति | ज्ञास्यति | पृच्छति | प्रक्ष्यति |
| शृणोति | श्रोष्यति | त्यजति | त्यक्ष्यति |

| वर्तमानकाले | भविष्यत्काले |
|---|---|
| शक्नोति | शक्ष्यति |
| उपविशति | उपवेक्ष्यति |
| उत्तिष्ठति | उत्थास्यति |
| गृह्णाति | ग्रहीष्यति |

## अभ्यासाः

१. सुरेन्द्रः मातुलगृहतः आगतवान् । तत्र कः कः किं करोति स्म इति सः मातरं वदति। तदनुसारं रिक्तस्थानानि पूरयतु :-
(पाकः, ध्यानम्, पूजा, निद्रा, पठनम्, योगासनम्, सम्मार्जनं, लालनम्)

१. मातुलानी पाकं करोति स्म।
२. मातामहः ____________।
३. मातुलः ____________।
४. रेखा ____________।
५. सुलेखा ____________।
६. राघवः ____________।



WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

७. श्रीलेखा -------------------- ।
८. मातामही -------------------- ।

२. एतेषां प्रश्नानाम् उत्तराणि लिखतु :-
१. नगरे कः वसति स्म ?
२. सः पिष्टघटं कुत्र अवलम्बितवान् ?
३. सः रात्रिकाले किं विचारितवान् ?
४. दरिद्रः पुत्रस्य किम् इति नामकरणं करिष्यति ?
५. पिष्टघटः कथं नष्टः ?

३. विवेकः श्वः विद्यालयं न **गमिष्यति**। सः चिकित्सालयं **गमिष्यति**। तत्र चिकित्सकं द्रक्ष्यति। तेन सह सम्भाषणं **करिष्यति**। स्वस्य अस्वास्थ्यं **निवेदयिष्यति**।
विवेकः श्वः किं किं करिष्यति इति उपरि लिखितम् अस्ति।
भवान् श्वः किं किं करिष्यति इति अधः लिखतु।
यथा - अहं श्वः देहलीं गमिष्यामि। तत्र -------------------- ।
-------------------- । -------------------- ।
-------------------- । -------------------- ।
-------------------- । -------------------- ।

४. शैलजा सर्वकारीय-विद्यालये शिक्षिका। 'श्वः विद्यालयं न गमिष्यामि' इति निश्चयं कृतवती सा। सा "श्वः किं किं करिष्यामि" इति योजनां कृतवती। सा योजना अधः सूचिता अस्ति। रिक्तस्थानं योग्येन भविष्यत्कालरूपेण पूरयतु :-
(गमिष्यामि, क्रेष्यामि, स्वीकरिष्यामि, श्रोष्यामि, प्रक्षालयिष्यामि, पास्यामि, पठिष्यामि, करिष्यामि, द्रक्ष्यामि, प्रत्यागमिष्यामि)
१. श्वः अहम् अवकाशं -------------------- ।
२. प्रातः उत्थाय वस्त्राणि -------------------- ।
३. प्रातः अष्टवादने रामनगरं -------------------- ।



WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

४. तत्र एकां शाटिकां ----------------------।
५. आम्रफलस्य रसं ----------------------।
६. सायं पुष्पोद्याने विहारं ----------------------।
७. पञ्चवादने कलामन्दिरे सङ्गीता ----------------------।
८. षड्वादने गृहं ----------------------।
९. भोजनानन्तरं दूरदर्शने धारावाहिकम् ----------------------।
१०. सखीगृहतः आनीतं कथापुस्तकं ----------------------।

५. एतेषां वाक्यानां भविष्यत्कालवाक्यानि लिखतु :-

यथा – सतीशः रामायणं पठति। <u>सतीशः रामायणं पठिष्यति।</u>

१. निर्मला पूजां करोति। ---करिष्यति---।
२. रञ्जनः आचार्यं नमति। ---नंस्यति---।
३. ललिता जलं पिबति। ---पास्यति---।
४. गोविन्दः आसन्दे उपविशति। ---उपवेक्ष्यति---।
५. अहं दुर्गुणं त्यजामि। ---त्यक्ष्यामि---।

६. एतेषां वाक्यानां बहुवचनवाक्यानि लिखतु :-

यथा – बालकः रसगोलकं खादिष्यति।

<u>बालकाः रसगोलकं खादिष्यन्ति।</u>

१. शिक्षकः पुस्तकं दास्यति। ---दास्यन्ति---।
२. शिक्षिकाः उत्तरं वक्ष्यति। ---वक्ष्यन्ति---।
३. छात्रः गीतं श्रोष्यति। ---श्रोष्यन्ति---।
४. बालिकाः प्रश्नं प्रक्ष्यति। ---प्रक्ष्यन्ति---।
५. अहं देशं रक्षिष्यामि। ---वयं रक्षिष्यामः---।

सन्धिविच्छेद :- प्रति + आगमिष्यामिः, भोजन + अनन्तरम्



WWW.GRADESETTER.COM

WWW.GRADESETTER.COM



# नैव क्लिष्टा न च कठिना

सुरस-सुबोधा विश्वमनोज्ञा
ललिता हृद्या रमणीया।
अमृतवाणी संस्कृतभाषा
नैव क्लिष्टा न च कठिना ॥ ॥ नैव क्लिष्टा ॥

कविकोकिल-वाल्मीकि-विरचिता
रामायण-रमणीयकथा।
अतीव - सरला मधुरमञ्जुला
नैव क्लिष्टा न च कठिना॥ ॥ सुरस ..... ॥

व्यासविरचिता गणेशलिखिता
महाभारते पुण्यकथा।
कौरव - पाण्डव - सङ्गरमथिता
नैव क्लिष्टा न च कठिना॥ ॥ सुरस ..... ॥

कुरुक्षेत्र - समराङ्गण - गीता
विश्ववन्दिता भगवद्गीता।
अमृतमधुरा कर्मदीपिका
नैव क्लिष्टा न च कठिना॥ ॥ सुरस ..... ॥

कविकुलगुरु - नवरसोन्मेषजा
ऋतु - रघु - कुमार - कविता।
विक्रम - शाकुन्तल - मालविका
नैव क्लिष्टा न च कठिना ॥ ॥ सुरस ..... ॥

---

*आचार्य के लिए :-*

*आचार्य द्वारा सस्वर कंठस्थ करा कर इस गीत का अभ्यास कराया जाए।*



WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

पञ्चमः पाठः

# तृतीया विभक्तिः




घटः

महिला जलम् आनयति।
महिला केन जलम् आनयति ?
महिला घटेन जलम् आनयति।




सुधाखण्डः

शिक्षकः लिखति।
शिक्षकः केन लिखति ?
शिक्षकः सुधाखण्डेन लिखति।



रेलयानम्

छात्राः प्रवासार्थं गच्छन्ति।
छात्राः केन प्रवासार्थं गच्छन्ति ?
छात्राः रेलयानेन प्रवासार्थं गच्छन्ति।




कन्दुकम्

बालकः क्रीडति।
बालकः केन क्रीडति ?
बालकः कन्दुकेन क्रीडति।



कुञ्चिका

लता तालम् उद्घाटयति।
लता कया तालम् उद्घाटयति ?
लता कुञ्चिकया तालम् उद्घाटयति।



तुला

आपणिकः पिष्टं तोलयति।
आपणिकः कया पिष्टं तोलयति ?
आपणिकः तुलया पिष्टं तोलयति।



WWW.GRADESETTER.COM

WWW.GRADESETTER.COM



कर्तरी

सौचिकः वस्त्रं कर्तयति।
सौचिकः कया वस्त्रं कर्तयति ?
सौचिकः कर्तर्या वस्त्रं कर्तयति।



लेखनी

बालिका लिखति।
बालिका कया लिखति ?
बालिका लेखन्या लिखति।

## अभ्यासाः

१. रिक्तस्थानानि योग्येन तृतीया-विभक्तिरूपेण पूरयतु :-

अ. १. घटः - घटेन।
२. दण्डः - --------।
३. हस्तः - --------।
४. रामः - --------।
५. शिक्षकः - --------।

आ. १. कन्दुकम् - कन्दुकेन।
२. फेनकम् - --------।
३. फलम् - --------।
४. मधुरम् - --------।
५. कङ्कणम् - --------।

इ. १. तुला - तुलया।
२. माला - --------।
३. पत्रिका - --------।
४. गङ्गा - --------।
५. सङ्गीता - --------।

ई. १. कर्तरी - कर्तर्या।
२. अङ्कनी - --------।
३ अंङ्गुली - --------।
४. नलिनी - --------।
५. कावेरी - --------।

(अहम् - मया, त्वम् - त्वया)

२. एतेषां प्रश्नानाम् उत्तरं लिखतु :-
१. महिला केन जलम् आनयति ?
२. छात्राः केन प्रवासार्थं गच्छन्ति ?
३. लता कया तालम् उद्घाटयति ?
४. बालिका कया लिखति ?
५. भवान् / भवती केन क्रीडति ?



WWW.GRADESETTER.COM